Title दीक्षाविधिः

Author AGE. १९४४

Extent ५

Subject धर्मशास्त्रम् संपूर्णम्

नं० ५६४३-घ
दीक्षाविधि :(धर्मशास्त्रम्)
पत्राणि ५(पञ्च)
(सम्पूर्णम्)

5643

F — 5

Complete

[illegible]

नं. २३०

१६८०

नं. २३०

१२७

नं. १९८३



ॐ श्रीगणेशाय नमः अथ दीक्षाप्रयोगः तत्र शिष्यः पू
१ र्वमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संक।
ल्पं कुर्यात् यथा अद्येत्यादितिथ्यंतममुकगोत्रअमुकदेव
शर्मा धर्मार्थकाममोक्षप्राप्तिकामः अमुकदेवता यामन्त्र
तेष्याऽमुकमंत्रदीक्षामहं करिष्ये इति संकल्प्य गुरुं वृणु
यात् तद्यथा ॐ साधु भवानास्तां साध्वास्ते ॐ अर्चयि
ष्यामो भवंतं ॐ अर्चय अर्चय ततो गंधपुष्पवस्त्रालंकारा

दिभिर्गुरुमभ्यर्च्य दक्षिणां ज्ञानं धृत्वा पठेत् ॐ अद्येत्यादि
अमुकगोत्रोऽमुकदेवशर्माऽमुकदेवतायामत्कर्तव्याऽ
मुकमंत्रदीक्षाकर्मणि अमुकगोत्रं श्रीमदऽमुकदेवश
र्माणमेभिः पाद्यादिभिरभ्यर्च्य गुरुत्वेन भवंतमहं वृणे वृ
तोऽस्मीति गुरुर्वदेत् प्रतिवचनं शिष्यो यथाविहितं कर्म
कुरु इति वदेत् यथाज्ञानतः करवाणीति गुरुः शिष्यस्य प्र
तिवचनं ततो गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कृत्वा द्वारे

२ संपूज्य दीक्षाख्याने प्रविश्य आसनमास्तीर्य तत्रैशाने
सिंहेशाणं यंत्रं मूलमन्त्रं ह्लिविद्यथा त्रिकोणं बिंदुसंयुक्तं
षट्कोणं वृत्तमंडले वसुपत्रं विहिताङ्कं भूगृहेणोपशो
भितं दीक्षायंत्रमिदं देवि दीक्षाकाले प्रपूजयेत् तत्र
ॐ क्लीं श्रीं गणेशाय नमः पूर्वे रं धर्माय नमः दक्षिणे व
रुणाय नमः पश्चिमे रं कुबेराय नमः उत्तरे रं आग्नेये अग्नये
नमः रं नैरृतये नमः नैरृते रं वायव्ये वरुणाय नमः

ऐं ईशाने ईशानाय नमः इति भूगृहं संपूज्य षट्कोणेषु
वामावर्तेन ऐं मायायै नमः ऐं मोहिन्यै नमः ऐं मीनायै न
मः ऐं मंगलायै नमः ऐं सर्वमंगलायै नमः ऐं महाविद्यायै
नमः ततस्त्रिकोणे ऐं गंगंगायै नमः ऐं यंयमुनायै नमः ऐं
संसरस्वत्यै नमः ईशानदिग्भागतः प्रपूजयेत् मूलदेवीबिं
दौ ऐं सदाशिवाय नमः ऐं महारौद्राय नमः ऐं कामेशाय नमः
ऐं कमनेश्वराय नमः ततः अष्टपत्रेषु वामावर्तेन ऐं ब्राह्म्यै न

२ मः एं नारायण्यै नमः कौमार्यै नमः अपराजितायै नमः
माहेश्वर्यै नमः चामुंडायै नमः वाराह्यै नमः नारसिंह्यै
नमः ततोष्टभैरवाः ऐं महाकालाय नमः कालाग्नये न
मः करालाय नमः विकरालाय नमः संहाराय नमः
रुरवे नमः उन्मत्तभैरवाय नमः ऐं ईशानाय नमः इति
येत्रमभ्यर्च्यैवं गुरुं प्रपूजयेत् ततोग्निकर्म पूर्वं कुंडं खनेत्
योनिरूपं त्रिकोणमरणिं प्रपूज्य वह्निमावाह्य ॐ रं रं रं त्र

ह्रैं वैश्वानर प्रज्वल २ फट् स्वाहा इत्यावाहनं संपूजयेत्व
ततश्चाज्यं संस्कृत्य तेनैवाज्येन परामंत्रेणान्यमंत्रेण वाष्टोत्त
रशतं जुहुयात् ततो देवीमावाह्य परां ध्यात्वा प्राङ्मुखो
गुरुस्तत्राभिमुखं शिष्यं विधाय शोधनादिकं कुर्यात् इति
कृत्वा ततः शिष्यदेहे भूतशुद्धिं कुर्यात् तद्यथा मूलाधार
हंस इति कुंडलिनीं पृथिव्या सह स्वाधिष्ठाने नीत्वा तत्र जले
पृथ्वीं लीनां तस्मान्नीत्वा जलं वह्नौ वह्निं वायौ वायुमाका

४ शे आकाशं मनसि मनो नादे नादं ध्वनौ ध्वनिं विचिंत्य तत्प
रमशिवे लीनं विचिंत्य यमिति वायुबीजेन पापपुरुषं सं
शोष्य रमिति वह्निबीजेन संदह्य वमिति वरुणबीजं शुक्ल
वर्णं सहस्रारे विचिंत्य तद्भवामृतेन शरीरमुत्पाद्य लला
टस्थं लमिति पृथ्वीबीजेन पीतवर्णेन सुदृढीकृत्य सोहं
मिति मंत्रेण कुंडलिनीमस्तकलोलीभूतां पंचभूतानि जी
वात्मानं च ब्रह्मपथेन स्वस्वस्थाने नियोजयेत् ततो देव

तद्रूपमात्मानं विभाव्य शिष्यहृदि हस्तं निधाय प्राण
प्रतिष्ठां कुर्यात् ॐ आं ह्रीं क्रों हंसः अमुकदेवतायाः प्रा
णा इह प्राणाः जीव इह स्थितः सर्वेंद्रियाणि इह स्थितानि
वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणाः इहागत्य सुखं चि
रं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां विधाय प्राणायामत्रयं
कारयेत् पुनराचमनत्रयं ततो मूलेन दिशो बद्ध्वा सर्वतो
ग्निप्राकारं विचिंत्य परां ध्यापयेत् गुरुः शिष्याय पंतानापरा

५

श्रीसिवर्के: समदं यंत्राग्रे दत्नकर्णमूले शनैः शनैर्मूल
मंत्रं त्रिः वामे एकवारं समर्पयेत् शिष्योपि दक्षिणादि
ना गुरुं तोषयेत् यथा दरिद्रः काकिनीं दद्यात् दशग्रामा
स्याताधिपः दशगाधिपश्चैकमेव यथाशक्ति प्रदीयते
इति शास्त्रोक्तवचनात् ततो वह्निं समापयेत् इति दीक्षा
विधिः सत्यप्रकारेण समाप्तमिति शिवं — १५.४८

जम्बू[illegible] =

56

नं० ५६४३-घ

कर्मकाण्डः (धर्मशास्त्राणि)

दीक्षाविधिः नं० ११८३

पत्राणि ५ (पञ्च) (सम्पूर्णम्)